Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४५१३

Title सौभाग्य कवचम्.
वामकेश्वर तन्त्रे

Author ०

Extent ५ Age ०

Subject तन्त्रम्

© Dharmartha Trust J&K. Digitized by eGangotri

सौभाग्यकवचम् वामकेश्वरतंत्रे

५५१२

4513

F. = 5

© Dharmartha Trust J&K. Digitized by eGangotri

सौभाग्यकवच ७२
५

© Dharmartha Trust J&K. Digitized by eGangotri

॥ सौ॰ क॰ ॥ ॥ श्रीगुरुभ्यो नमः ॥ ॐ ॥ कैलासशिखरे रम्ये सुखासीनं सुरार्चितं ॥ गिरीशं गिरिजा न
॥१॥ त्वा स्तोत्रैर्वेदार्यगोचरैः ॥१॥ प्रणम्य परया भक्त्या नमष्ट्वुत्कृतांजलिः ॥ श्रीदेव्युवाच ॥ श्र
द्धस्य रक्षणकरं सर्वसंपत्करं वद ॥२॥ ईश्वर उवाच ॥ एतत्सौभाग्यकवचं रहस्यातिरहस्य
कं ॥ सौभाग्यकवचं देवि शृणु सौभाग्यदं परं ॥३॥ शिखायां सततं पातु महात्रिपुरसुंदरी ॥ शि
रः कामेश्वरी नित्या ललाटं भगमालिनी ॥४॥ नित्यक्लिन्ना च तद्दक्षं नेत्रं भेरुंडा पश्चिमं शिरः ॥ वह्निवा
सिन्यस्य वामं वज्रेश्वर्यलकं तथा ॥५॥ शिवदूती ललाटं च त्वरिता तस्य दक्षिणं ॥ तद्वामपार्श्व
मवतात्तथैव कुलसुंदरी ॥६॥ नित्या पातु भ्रुवोर्मध्यं भ्रुवं नीलपताकिनी ॥ वामभ्रुवं च विजया
नयनं सर्वमंगला ॥७॥ ज्वालामालिन्यसितवामं चित्रा रक्षतु नासिकां ॥ दक्षश्रोत्रं तु गणपः ॥ शिव ॥
सव्यं पातु महेश्वरः ॥८॥ दक्षसव्यं तु बटुकः कपोलं क्षेत्रपालकः ॥ दक्षनासापुटं दुर्गा तदन्यं ॥१॥

© Dharmartha Trust J&K. Digitized by eGangotri

पातु मां रती ॥ १० ॥ अणिमा दक्षिणे शंखं महिमा च तदन्यकं । दक्षगंडं तु गरिमा लघिमा
वोत्तरं तथा ॥ ११ ॥ ऊर्द्ध्वं मे छंदप्राप्तिसिद्धिः प्राकाम्यमधरोष्ठकं । ईशत्वं मूर्द्धदंतांश्च वशित्वमध
रोस्तथा ॥ १२ ॥ इच्छासिद्धिस्तु रसनां मोक्षसिद्धिस्तु तालुकं । तालुमूलद्वयं ब्राह्मी माहेश्वर्योत्तर
दंतां ॥ १३ ॥ कुमारी चिबुकं पातु तदधः पातु वैष्णवी । कंठं रक्षतु वाराही इंद्राणी रक्षतादधः ॥ १३
हृत्कटिकां तु चामुंडा मस्तकं लक्ष्मीस्तु सर्वतः । सर्वसंक्षोभिणी मुद्रा स्कंधं रक्षतु दक्षिणं ॥ १४ ॥
तदन्यं द्राविणी मुद्रा पायाद्दंसद्वयं क्रमात् । आकर्षणी मुद्रा देवी चोन्मादिन्या च दक्षिणं ॥ १५ ॥ भु
जं महांकुशा वामं रक्षेच्चरी दक्षकरहकं । वामकक्षं बीजमुद्रा योनिः स्याद्दक्षवाहुकं ॥ १६ ॥ लस
त्रिखंडिनी मुद्रा वामवाहुं प्रपाजयेत् । कामाकर्षिणिका नित्यं रक्षताद्दक्षकूर्परं ॥ १७ ॥ कूर्परं वा
ममवताद्बुद्ध्याकर्षिणिका तथा ॥ अहंकाराकर्षिणी तु प्रकोष्ठं पातु दक्षिणं ॥ १८ ॥ शब्दाकर्षि

© Dharmartha Trust J&K. Digitized by eGangotri

॥सौ०क॰ णिका वामं स्पर्शाकर्षिणिका वतु ॥ तन्मध्यं दक्षिणं पातु रूपाकर्षिणिके तरं ॥१८॥ रसाकर्षिणि
॥२॥ काऽपातु मणिबंधं च दक्षिणं ॥ गंधाकर्षिणिका वामं चित्ताकर्षिणिका वतु ॥२०॥ करमध्यं दक्षिणं धैर्या
कर्षिणी पातु वामकं ॥ स्मृत्याकर्षिण्यसौ पाणिं नामाकर्षिण्यदक्षिणं ॥२१॥ बीजाकर्षिण्यसौ पाया
स्तलं दक्षिणांगुलीः ॥ आत्माकर्षिण्यदक्षिण्या अमृताकर्षिणीनखान् ॥२२॥ शरीराकर्षिणी वामनखा
न्रक्षतु सर्वदा ॥ अनंगकुसुमा शक्तिः पातु दक्षस्तनोपरि ॥२३॥ अनंगमेखलाऽभ्यान्यस्तनोर्ध्वम
2 भिरक्षतु ॥ अनंगमदनादक्षस्तनं तच्चूचुकं पुनः ॥२४॥ रक्षतादघने शं देवी ह्यनंगमदनातुरा ॥ अनं
गरेखा वामं च वक्षोजं तस्य चूचुकं ॥२५॥ अनंगवेगिनी क्रोडमनंगस्यांकुशावतु ॥ अनंगमालि
नी पायाद्धृदयस्थं नमद्दिशं ॥२६॥ सर्वसंक्षोभिणी रुद्वा सर्वविद्राविणी परा ॥ कुक्षिं सर्वाकर्षि ॥शिव॥
णी नु पातु पार्श्वं तु दक्षिणं ॥२७॥ आह्लादिनी वामपार्श्वं मध्यं संमोहिनी परं ॥ सा सर्वस्तंभिनी पृष्ठं ॥२॥

© Dharmartha Trust J&K. Digitized by eGangotri

नाभिं वै सर्वजृंभिणी ॥ २८ ॥ वशंकरी च क्लिदेशं कटिं सा सर्वरंजिनी ॥ उन्मादिनी तु सर्वाघा
पायान्मेघनमंडलं ॥ २९ ॥ सर्वार्थसाधनी शक्तिर्नितंबं रक्षतादियं ॥ दक्षस्फिचं सदा पातु सर्व
संपत्प्रपूरिणी ॥ ३० ॥ सर्वमंत्रमयी शक्तिः पातु वामं स्फिचं मम ॥ पायात्कुकुंदरद्वंद्वं सर्वद्वंद्वक्षयं
करी ॥ ३१ ॥ सर्वसिद्धिप्रदा देवी पातु दक्षिणवक्षणं ॥ सर्वसंपत्प्रदा देवी तदन्यं पातु वंक्षणं ॥ ३२ ॥
सर्वप्रियंकरी देवी गुह्यं रक्षतु मे सदा ॥ मेढ्रं रक्षतु मे देवी सर्वमंगलकारिणी ॥ ३३ ॥ सर्वकामप्रदा
देवी पातु मुष्कं तु दक्षिणं ॥ पायात्तदन्यं देवी तु सर्वदुःखविमोचिनी ॥ ३४ ॥ सर्वमृत्युप्रशमनी देवी
पातु गुदं मम ॥ पातु देवी देहमध्यं सर्वविघ्ननिवारिणी ॥ ३५ ॥ सर्वांगसुंदरी देवी रक्षताद्दक्षसक्थि
कं ॥ वामसक्थितलं पायात्सर्वसौभाग्यदायिनी ॥ ३६ ॥ अष्ठीवन्तं मम सर्वज्ञा देवी रक्षतु दक्षिणं
॥ अन्याष्ठीवं सर्वशक्तिर्देवी पातु चिरं मम ॥ ३७ ॥ सर्वैश्वर्यप्रदा देवी दक्षजानुं सदावतु ॥ सर्वज्ञान

© Dharmartha Trust J&K. Digitized by eGangotri

॥सौ० क॥ मयी देवी तदन्यज्जानु रक्षतु ॥ ३८ ॥ अव्यादियं दक्षजंघां सर्वव्याधिविनाशिनी ॥ तदन्यां पातु दे
॥२॥ वंतः सर्वाधारस्वरूपिणी ॥ ३९ ॥ सर्वपापहरा देवी दक्षगुल्फं सदावतु ॥ सर्वानंदमयी देवी वामगुल्फं
सदावतु ॥ ४० ॥ रक्षांघ्रिं वशिनी पातु पूर्वं वाग्देवता मम ॥ सर्वकामेश्वरी पूर्वं सदा वाग्देवतोत्तरं ॥ ४१
॥ पार्ष्णिं मे दक्षिणं पायात्सर्वरक्षास्वरूपिणी ॥ अव्यात्सव्यं सदा पार्ष्णिं सर्वेप्सितफलप्रदा ॥ ४२ ॥ मो
3 दिनी प्रपदं पातु दक्षिणं विमलेतरं ॥ अंगुलीररुणा पातु दक्षपादनखोच्चला ॥ ४३ ॥ तदन्यान्नखि
नी पायात्सदा वाग्देवतेतरं ॥ दक्षपादतलं सर्वेश्वरी वाग्देवता मुदा ॥ ४४ ॥ वामपादतलं पायात्कौ
लिनी देवता मम ॥ कुर्वंतु जंभणा बाणास्त्रे जो क्षयाकर्षणं मम ॥ ४५ ॥ मोहं संहरताद्दिक्षु कोदंडे भृंगमो ॥शिव॥
र्विकं ॥ करोतु सततं पाशो वशीकरणमुत्तमं ॥ ४६ ॥ विदध्यात्त्वं कुशो नित्यं स्तंभनं शत्रुसंगरे ॥ पीठं मे का ॥२॥
मरूपाख्यं पातु कामाद्रिकामतः ॥ ४७ ॥ पूर्णं पूर्णगिरेः पीठं पायाद्दर्पमदीयकं ॥ जालंधरस्य जालं

© Dharmartha Trust J&K. Digitized by eGangotri

ध्रुवं पीठं रक्षतु मे सदा ॥ ४८ ॥ सायुज्यं तनुतां प्राज्यं श्रीपीठं श्रीकरं मम ॥ कामेश्वरी चात्मतत्त्वं रक्षे-
द्वज्रेश्वरी च मां ॥ ४९ ॥ विद्यातत्त्वं शैवतत्त्वं पायाद्धीभगमालिनी ॥ कामं छिद्यान्मलाभं तु मम कृतार्णव-
मासनं ॥ ५० ॥ ॐ ध्रुवं वोधापाहं हन्याद्दक्रूपोतां बुलासनं ॥ जोषं दिव्यासनं सिंहाद्व्यात्मा दिव्यरूप-
माकृ ॥ ५१ ॥ मोहं संहरतां चक्रं मर्दं मंत्रासनं महत् ॥ मासयं नाशयेन्नित्यं मम साध्यासनं जनात् ॥ ५२
आधारं त्रिपुरा रक्षेत् स्वाधिष्ठानं पुरेश्वरी ॥ मणिपूरं मणिद्योतं पाया त्रिपुरसुंदरी ॥ ५३ ॥ अना-
हतं भवं नित्यं त्रिपुरवासिनी ॥ विशुद्धं त्रिपुराश्रीश्च आज्ञां त्रिपुरमालिनी ॥ ५४ ॥ इडां मे त्रिपु-
रासिद्धा त्रिपुरांबा च पिंगलां ॥ सुषुम्णां पातु मे नित्यं महात्रिपुरसुंदरी ॥ ५५ ॥ त्रैलोक्यमोहनं चक्रं
रोमकूपांश्च पातु मे ॥ सर्वाशापूरकं चक्रं सप्तधातूंश्च रक्षतु ॥ ५६ ॥ सर्वसंक्षोभणं चक्रं प्राणाद्यं
वायुपंचकं ॥ सौभाग्यदायकं चक्रं नागाद्यनिलपंचकं ॥ ५७ ॥ सर्वार्थसाधनं चांतःकरणानां चतुष्ट-

© Dharmartha Trust J&K. Digitized by eGangotri

यं ॥ सर्वरक्षाकरं चक्रं पायात्पातु यष्टकं च मे ॥ ५५ ॥ सर्वरोगहरं चक्रं रक्षतान्मे गुणत्रयं ॥ सर्वसिद्धिप्रदं
चक्रं ममाव्यात्कोशपंचकं ॥ ५६ ॥ सर्वानंदमयं चक्रं यशः कीर्त्तिं च रक्षतु ॥ सौंदर्यमन्मथः पायाद्र-
तिः पातु रतिं मम ॥ ५७ ॥ प्रीतिर्मे पातु सा प्रीतिकरस्थाहं च वसंतकः ॥ संकल्पं कल्पको ध्यानं मह-
लक्ष्मीर्मम श्रियं ॥ ५८ ॥ कांतिं कापालिनी रक्षेन्मंदिरं मलिमंडपः ॥ पुत्रान्नु शंखनिधिः पायाद्भार्यां पद्म-
निधिस्तथा ॥ ५९ ॥ मार्गे मां भैरवी रक्षेन्मातंगी भुक्तं सदा ॥ अष्टदिक्षु महेंद्राद्याः सायुधाः पांतु स-
र्वदा ॥ ६० ॥ पायादूर्ध्वदिशं ब्रह्मा विष्णुश्चक्रायुधोऽप्यधः ॥ अनावृतानि स्थानानि कवचेन तु यानि मे ॥ ६१
तानि रक्षंतु सततं शिवादिसुरवः क्रमात् ॥ एतत्सौभाग्यकवचं स्वकरे यस्तु धारयेत् ॥ ६२ ॥ त्रिसं-
ध्यं पठति श्रीत्या शृणुयाद्वा समाहितः ॥ तस्य शीघ्रेण सिध्यंति सिद्धयस्त्वणिमादयः ॥ ६३ ॥ गुटिका
पादुका दृष्टसिद्धयः संभवंति च ॥ वश्यादीन्यष्टकर्माणि योगभोगांगसंभवं ॥ ६४ ॥ ब्रह्मविष्णुगिरी

© Dharmartha Trust J&K. Digitized by eGangotri

॥सौ० क॰ क्षेंऽङकंदर्प्पशविभिः समः॥ विहरत्यखिलाल्लोकान् सिद्धगंधर्वसेवितः॥६५॥ तस्यस्मरण
॥५॥ मात्रेण महाभूतपिशाचकाः॥ कीटवत्संपलायंते कूष्मांडभैरवादयः॥६९॥ तस्यांघ्रितोयपतन
नाम्बुशाम्यंति महारुजः॥ तस्मादकमलासक्तरजोलेशाभिमर्शनात्॥७०॥ सर्वंभवति श्रीपु
ललितेलोकं सचराचरं॥ भूपालमहिलाभूपाः किंमु मायाविमोहिता॥७१॥ ॥इति श्रीवामके
श्वरतंत्रे नित्याषोडशार्णवे सौभाग्यकवचं समाप्तम्॥ ॥शुभमस्तु॥ लिखितमिदं
कवचं द्विवेदीकृष्णदेवात्मजकान्हदेवेन॥ संवत् १८०[illegible] आषाढकृष्ण ६ शनौ॥ ॥

॥शिव॥
॥५॥

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri